जनने, पितृमातृभर्त्तृमरणाशौचान्तिमदिनतत्प्रभातयोर्ज्ञातिमरणेऽपि न दिनद्वयत्रयवृद्धिः। स्वपुत्रयोस्तु तथा जनने मातापित्रोस्तु तथा मरणे न द्विनद्वयत्रयवृद्धिः। जननाशौचयोस्तु सन्निपाते पूर्व्वार्द्धे जातोयदाऽशौचाभ्यन्तरे स्रुतस्तदा सपिण्डानां सद्यः शौचेन पूर्व्वाशौचस्य नाशः। तन्नाशादेव पराद्धजातमातापितृव्यतिरिक्तानां परजननाशौचस्य निवृत्तिः। परजातमरणे तु न तथा तस्य पूर्वजननावधिस्थायित्वादिति गुरुचरणाः। एवं द्वितीयजातस्य पित्रोस्तु पूर्व्वार्द्धजातमरणे पूर्व्वाशौचकालावधि अङ्गास्पृश्यत्वयुक्तमशौचं, पराद्धजातमरणे तु स्वावधिजननाशौचमङ्गास्पृश्यत्वयुक्तमिति। औत्सर्गिकसमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन शुद्धिः। तदन्यकालयोस्तु दीर्घकालाशौचकालेन शुद्धिः। ततश्च पुत्रवत्याविंशतिरात्राशौचान्त्यदिने पत्युर्मरणे बहुकालेन जननाशौचकालेन शुद्धिः तथा सपिण्डद्वयजननजातद्वादशाहान्त्यदिने पितृमातृभर्त्तृमरणेऽपि बहुकालीनाशौचकालेन शुद्धिः। प्रथमदिने सपिण्डमरणद्वये यावदशौचं सर्वगोत्रास्पृश्यत्वयुक्तम् एवं प्रथमाहे सकुल्यद्वयरणेऽङ्गास्पृश्यत्वयुक्तं त्रिरात्रम्। तेनैतत् त्रिरात्रं गुरु विदेशमरणादौ त्रिरात्रं तु लघु स्नानेनैवाङ्गास्पृश्यत्वानिवृत्तेः। ततश्चोभयोः सन्निपाते गुरुणैव शुद्धिः। एवं विदेशस्थमृतज्ञातित्रिरात्राद्विदेशस्थमृतपितृमातृभर्त्तृत्रिरात्रं गुरु। संपूर्णाशौचे तु अशक्तानामपि यावदशौचमक्षारलवणाशित्वदर्शनात्। अत्रापि तावत्कालं तथासिद्धत्वात्तत्रापि गुरुणैव शुद्धिः। तुल्यत्रिरात्रयोस्तु सन्निपाते पूर्व्वेणैव शुद्धिः। तथा कन्यापुत्रयमजोत्पत्तौ मातुर्मासेन शुद्धिः। तयोरशौचमध्ये मातुः कन्यामरणे सद्यः शुद्धिर्न पुत्रमरणात्, अन्येषान्तु प्रथमजातमरणात् शुद्धिः। न परजातमरणात् एवमन्यद्भाव्यं सुधीभिः” शुद्धितत्त्वम्।

**अशौचान्त** पु० अशौचस्यान्तोयत्र। स्वजात्युक्ताशौचावसानाधारे दशमादौ दिने “अशौचान्ताद् द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम्”। “अशौचान्ताद्द्वितीयेऽह्नि यस्य नोत्सृज्यते वृषः” इति च स्मृतिः। [२तच्छून्ये त्रि०।

**अशौर्य्य** न० अभावे न० त०। १शौर्य्याभावे अपराक्रमे न० ब०।

**अश्न** त्रि० अश्नुते व्याप्नोति अश्नाति वा अश–नन्। १व्यापनशीले २भोजनशीले च “स्मगोनाश्नो अति यज्जुगुर्य्यात्” ऋ० १।१७३।२ “अश्नोव्यापकः अशनशीलश्च” भा० “कर्म्मणि नन्। ३व्याप्ते “तस्य भ्राता मध्यमो अस्त्यश्नः” ऋ० १।१६४। १। “अश्नः व्याप्तः भा० ४असुरभेदे पु० सुषाव्नु षसः सूर्य्येण स्तवानश्नस्य” ऋ० २।२०।५। “अश्नुते स्वतेजसा सर्वं जगदित्यश्नः कश्चिदसुरः भा०। “अध्वर्य्यवोयः स्वश्नं जघान” ऋ० २।१४।५।५। करणे नन्। सोमकण्डनप्रस्तरे। “नृभिर्धूतः सुतोश्नैरव्यो वारैः” ऋ० ८।२।२। अश्नैः अश्मभिः करणभूतैः सुतोऽध्वर्युभिरभिषुतः” भा०। अश्नुतेऽम्बरम्। ६मेघे निरु०।

**अश्नीतपिबता** स्त्री अश्नीत पिबत इत्युच्यते यस्यां निदेशक्रियायाम् मयू० स०। भोजनादिनिदेशक्रियायाम् “अश्नीतपिबतीयन्ती प्रसृता स्मरकर्म्मणि” भट्टिः।

**अश्मक** पु० अश्मेव स्थिरः निश्चलत्वात् इवार्थे कन्। १ऋषिभेदे “वेदस्थानेन वात्स्येन तथाश्मकसुमन्तुना” भा० शा० प०। २दक्षिणदेशस्थे देशभेदे। “गन्तव्योमलयः श्रीमान् पर्व्वतो धातुमण्डित” इत्युपक्रम्य “तथाश्मका पुलिन्दाश्च कलिङ्गाश्च विशेषतः” रा० कि० का०। वृहत्संहितायान्तु स देशः पश्चिमोत्तरस्यां दिशि। “दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालहनमद्राः। अश्मककुलूतलहडस्त्रीराज्यसिंहवनखण्डाः” इति कुर्म्मविभागे उक्तम्” अतउभयत्रापि तन्नामको देशः। तस्य जनपदवाचित्वात् तद्देशवासिषु तद्राजनि च ततः क्षताणो बहुषु लुक्। ३तद्देशवासिनि ४तद्राजनि च ब० व०। “साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्” पा० सू० साल्वजनपदावयवत्वेनोक्तेः ५साल्वदेशावयवे च साल्वदेशश्च वृह० सं० कूर्म्मविभागे नवसु खण्डेषु मध्यखण्डे उक्तः “भारतवर्षे मध्यात् प्रागादि विभाजिता देशाः भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसंख्याताः” इत्युपक्रम्य “गजाह्वयश्चेति मध्यमिदम्” इति नवखण्डे कूर्म्मभागे मध्यखण्डे तस्य स्थितिरुक्ता अतः साल्वावयवनामकोऽश्मकः तदीयदक्षिणप्रदेशस्थः इति गम्यते तेन रामायणवाक्यं तद्विषयकमिति न विरोधः। अश्मके साल्वावयवे भवः इञ् आश्मकिः। तद्देशभवे त्रि० तद्राजनि च बहुषु लुक् आश्मकाः साल्वावयवावश्मकवासिषु तद्राजसु च ब० व०। स्त्रियां न लुक् आश्मक्यः। साल्वशब्देऽस्य विवृतिः।

**अश्मकदली** स्त्री अश्नुते अश–मनिन् कर्म्म०। काष्ठकदल्याम्।

**अश्मकुट्ट** पु० अश्मनि प्रस्तरएव धान्यादिकं कुट्टयति कुट्ट–अण्–उप० स०। वानप्रस्थभेदे, तस्योदूखलादिशून्यत्वेन तण्डुलादेर्वितुषीकरणस्य तत्रैव विधानात्तथात्वम्। “अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोऽपि वा” मनुः। स्खुल्।